मात् सर्वेषां विषयाणामेव दुःखादिमत्त्वमिति भेदः ।

**आधिपत्य** न० अधिपतेर्भावः कर्म्म वा पत्यन्तत्वात् यक् । १स्वामित्वे "अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् । गीता । "राष्ट्रस्याधिपत्यं मे देहि" ऋ० १०,११४,५ । "तदेनमासां प्रजानामाधिपत्याय राज्याय" शत० ब्रा० "सर्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति" इति मनुः "यक्षाणामाधिपत्यञ्च राजराजत्वमेव च" भा० व० २७४ अ० । २राजकार्य्ये प्रजापालनादौ । "दुर्य्योधनं त्वहितं वै निगृह्य पाण्डोः पुत्रं प्रकुरुष्वाधिपत्ये । अजातशत्रुर्हि विमुक्तरागो धर्म्मेणेमां पृथिवीं शास्तु राजन्" भा० व० प० ४ अ० ।

**आधिबन्ध** पु० आधिः बहुप्रजानां कथं पालनं स्यादिति चिन्ता एव बन्धः । बहुप्रजारक्षणार्थचिन्तारूपबन्धे । "कथं राजन् ! प्रजारक्षाधिबन्धेन युज्यते" युधिष्ठिरप्रश्ने तच्चिन्ताधिरूपबन्धनिवारणाय यथा राज्ञाचरणीयं तथोक्तं तं प्रति भीष्मेण भा० शा० ७० अ० "समासेनैव ते राजन् ! धर्मान् वक्ष्यामि शाश्वतान् । विस्तरेणेह धर्माणां न जात्वन्तमवाप्नुयात् । धर्मनिष्ठान् श्रुतवतो देवव्रतसमाहितान् । अर्च्चयित्वा यजेथास्त्वं गृहे गुणवतो द्विजान् । प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च । अथ सर्व्वाणि कुर्व्वीथाः कार्य्याणि सपुरोहितः । धर्म्मकार्य्याणि निर्वर्त्य मङ्गलानि प्रयुज्य च । ब्राह्मणान् वाचयेथास्त्वमर्थसिद्धिजयाशिषः । आर्ज्जवेन च सम्पन्नो धृत्या बुद्ध्या च भारत ! । यथार्थं प्रतिगृह्णीयाः कामक्रोधौ च वर्ज्जयेः । कामक्रोधौ पुरस्कृत्य योऽर्थं राजाऽनुतिष्ठति । न स धर्म्मं न चाप्यर्थं प्रतिगृह्णाति बालिशः । मा स्म लुब्धांश्च मूर्खांश्च कामार्थेषु प्रयूयुजः । अलुब्धान् बुद्धिसम्पन्नान् सर्वकर्म्मसु योजयेः । मूर्खो ह्यधिकृतोऽर्थेषु कार्य्याणामविशारदः । प्रजाः क्लिश्नात्ययोगेन कामक्रोधसमन्वितः । बलिषष्ठेन शुल्केन दण्डेनाथापराधिनाम् । शास्त्राणि तेन लिप्सेथा वेतनेन धनागमम् । दापयित्वा करं धर्म्यं राष्ट्रं नीत्या यथाविधि । तथैतं कल्पयेद्राजा योगक्षेममतन्द्रितः । गोपायितारं दातारं धर्मनित्यमतन्द्रितम् । अकामद्वेषसंयुक्तमनुरज्यन्ति मानवाः । मा स्माधर्मेण लोभेन लिप्सेथास्त्वं धनागमम् । धर्मार्थावध्रुवौ तस्य यो न शास्त्रपरो भवेत् । अर्थशास्त्रपरो राजा धर्मार्थौ नाधिगच्छति । अस्थाने चास्य तद्वित्तं सर्वमेव विनश्यति । अर्थमूलो हि हिंसाञ्च कुरुते स्वयमात्मनः । करैरशास्त्रदृष्टैर्हि मोहात् सम्पीडयेत् प्रजाः । ऊधश्छिन्द्यात्तु यो धेन्वाः क्षीरार्थी न लभेत् पयः । एवं राष्ट्रमयोगेन पीडितं न विवर्द्धते । यो हि दोग्ध्रीमुपास्ते च स नित्यं विन्दते पयः । एवं राष्ट्रमुपायेन भुञ्जानो लभते फलम् । अथ राष्ट्रमुपायेन भुज्यमानं सुरक्षितम् । जनयत्यतुलां नित्यं कोषवृद्धिं युधिष्ठिर ! । दोग्ध्री धान्यं हिरण्यञ्च मही राज्ञा सुरक्षिता । नित्यं स्वेभ्यः परेभ्यश्च तृप्ता माता यथा पयः । मालाकारोपमो राजन् ! भव माङ्गारिकोपमः । तथा युक्तश्चिरं राज्यं भोक्तुं शक्ष्यसि पालयन् । परचक्राभियानेन यदि ते स्याद्धनक्षयः । अथ साम्नैव लिप्सेथा धनमब्राह्मणेषु यत् । मा स्म ते ब्राह्मणं दृष्ट्वा धनस्थं प्रचलेन्मनः । अन्त्यायामप्यवस्थायां किमु स्फीतस्य भारत । धनानि तेभ्यो दद्यास्त्वं यथाशक्ति यथाऽर्हतः । सान्त्वयन् परिरक्षंश्च स्वर्गमाप्स्यसि दुर्ज्जयम् । एवं धर्मेण वृत्तेन प्रजास्त्वं परिपालय । स्वन्तं पुण्यं यशो नित्यं प्राप्स्यसे कुरुनन्दन ! । धर्म्म्येण व्यवहारेण प्रजाः पालय पाण्डव ! । युधिष्ठिर ! यथा युक्तो नाधिबन्धेन योक्ष्यसे । एष एव परो धर्मो यद्राजा रक्षति प्रजाः । भूतानां हि यदा धर्मो रक्षणं परमा दया । तस्मादेव परं धर्म्मं मन्यन्ते धर्म्मकोविदाः । यो राजा रक्षणे युक्तो भूतेषु कुरुते दयाम् । यदङ्गा कुरुते पापमरक्षन् भयतः प्रजाः । राजा वर्षसहस्रेण तस्यान्तमधिगच्छति । यदङ्गा कुरुते धर्म्मं प्रजा धर्मेण पालयन् । दश वर्षसहस्राणि तस्य भुङ्क्ते फलं दिवि । स्विष्टिः स्वधीतिः सुतपा लोकान् जयति यावतः । क्षणेन तानवाप्नोति प्रजा धर्मेण पालयन् । एवं धर्मं प्रयत्नेन कौन्तेय ! परिपालय । ततः पुण्यफलं लब्ध्वा नाधिबन्धेन योक्ष्यसे" ।

**आधिभोग** पु० आधेर्बन्धकद्रव्यस्य भोगः । बन्धकद्रव्यस्य भोगे "गोप्याधिभोगे नो वृद्धिः" आधिशब्दे उदा० आधेर्मनोव्यथाया अनुभवरूपे २भोगे च ।

**आधिभौतिक** त्रि० भूतानि व्याघ्रसर्पादीन्यधिकृत्य जातम् । अधिभूत+ठञ् द्विपदवृद्धिः । व्याघ्रसर्पादिजनिते दुःखे । आधिदैविकशब्दे विवृतिः ।

**आधिमन्यव** अधिमन्यवे हितः अण् । ज्वराग्नौ हारा० ज्वरसन्तापे हि अधिकव्यथोद्भवात्तस्य तथात्वम् ।

**आधिरथि** पु० अधिरथः सूतराड्सारथिः तस्यायम् इञ् । सूतपुत्रे कर्णे "हिरण्यकण्ठीः प्रमदाः ग्रामान् वा बहुगोकुलान् । किं ददानीति तं विप्रमुवाचाधिरथिस्ततः भा०